Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ नदीतरणयन्त्रम् —

भूपुरद्वन्द्वमालिख्य मध्ये पार्थिवमक्षरम् ।
चतुष्कोणे तु लंकारमष्टदिक्षु ठमालिखेत् ॥

परितो वायुबीजं च नैरन्तर्ये तु संमुखम् ।
प्रतिष्ठाप्यानिलं यन्त्रे तोयसन्तरणे बुधः ॥

कृत्वा यन्त्रं जले देवि तत्परं निम्नगां तरेत् ।
यन्त्रोपरि स्वयं स्थित्वा देवदत्तं प्रकल्प्य वा ॥

चतुष्कोणे तु लंकारमष्टदिक्षु ठमालिखेत् ।
त्रिवारं मनसा मन्त्रं जपेदेकाग्रमानसः ।
निम्नगां तरसा तीर्त्वा सुखं गच्छति मानवः ॥

अस्यार्थः — प्रथममष्टकोणं मध्ये लंकारं, बहिश्चतुष्कोणे लंकारं, अष्टकोणे ठंकारं, ओं नमः शरभसाळुवपक्षिराजाय सर्वभूतमयाय सर्वमूर्तये रक्ष रक्ष शीघ्रं तारय तारय ओं श्रीं ह्रीं [२] लं क्षं लं टं लं यं प्रतरणाय स्वाहा,

ओं नमो भगवते महाशरभसाळुवपक्षिराजाय वरवरद अष्टमूर्तये अखिलमयाय पालय पालय भक्तवत्सलाय प्रणतार्तिविनाशनाय उत्तारयोत्तारय शीघ्रमुत्तारय श्रां ह्रां ओं हां देवदेवाय उत्तारणाय स्वाहा ॥

पञ्चवारं जपेन्नैव साळुवेशो जगन्मयः ।
तस्य हस्तं समुद्गृह्य तत्क्षणादुद्धरेज्जलात् ॥